स्मृतिसामग्रीतोऽनुभवसामग्र्या बलवत्वादिति भावः · इदं च वक्ष्यमाणगतिमनुरुध्योक्तं नादृशास्मृतित्सत्वेपि भिन्नविषयेऽनुमिति
सामग्रीबलवत्वान्न तथास्मृतावप्यनुमितेरेवोत्पत्तिः अन्यथा यत्र प्रथमं वह्निव्याप्यत्वधीः किंचिति देशावास्याप्यस्मरणे

भवतादृशव्याप्यवत्सादृश्यपरिच्छायितधर्मविषयकं तत्रोपमितिसंभवेऽतिव्याप्तेः नवतत्प्रकरणस्य सादृश्यविशि
ष्टपिंडप्रत्यक्षस्याभावात्कथमुपमितिरिति वाच्यं अनुमितौ परामर्शजनकत्वेनेवोपमितावप्यतिदेशवाक्यार्थस्मृतिज
नकत्वेनैव करणत्वादिति ननूपमितेः पक्षताजन्यत्वाभावादेवनातिव्याप्तिरत आह नहीति विशेषणांतरेति अव्य
वहितेत्यादिविशेषणांतरमित्यर्थः ननु सत्यपि पक्षत्वलीयामित्यासाविरोधीत्यादिविशेषणेनेव वारणात्तद्वारणा १८
५क र्थं स्वाधिमज्ञानपदस्य वैयर्थ्यमत आह ज्ञानमेव परमिति एवं विरोधीत्यादिविशेषणे सति । संस्कारेति परामर्शनाशे
स्यापुपलक्षणं · स्वरूपसती जनकत्वेनाविवक्षिता व्याप्यताधीति व्याप्यत्वप्रकारकसहचारधीत्यर्थः तेन पक्षधर्म
ताविषयकत्वलाभः · उपपत्तौ अनुमित्याद्युपपत्तौ · मानाभावादिति सामानाधिकरण्यस्य व्याप्तित्वेन प्रत्येकसामाना
धिकरण्यातिरिक्तस्य सर्वदृष्टत्वात्क साम्यमानाधिकरण्यस्याभावादितितत्यर्थः । एकस्य · व्याप्यतारूपस्य · वह्निमदन्यावृत्तित्व
विशिष्टवह्निसामानाधिकरण्यव्याप्यतावच्छेदकतादृशव्याप्यसामानाधिकरण्याभावाप्रतियोगिवह्निसामानाधिकरण्य
ग्राहकं सामानाधिकरण्यभावस्य विशेष्यस्यैक्यादेकस्येत्याद्युपपत्तिरत एव प्रकारभेदेनेत्यपि संगच्छते धूमसमाना

धिकरणोत्पादेरक्षिसाधनभेदेन भिन्नत्वाज्ञानवच्छेदकत्वमिति इष्टव्यं यत्तु साध्यसामानाधिकरण्यावच्छेदकावच्छिन्नसाध्य
सामानाधिकरण्यव्याप्यत्वमिति मित्रोक्तेरिति तन्न प्रकारभेदेनेत्यस्यासंगतत्वापातादिति वह्निप्रत्ययत्वे इति पाठः सम्यक्
वह्निप्रत्ययत्वेति पाठे साहचारधीरित्यतो वह्निव्याप्यवति वह्निप्रत्ययसहचारपक्षतेव सतीति व्याख्यासंवलितायोजना
विशेषइति वह्निमत्त्वप्रकारेण तत्र वह्निनिश्चयेपि तदधिकरणतावच्छेदकप्रकारेणानिर्णयादित्यर्थः ।देशांतरे । इंद्रिया
सन्निकृष्टे न तु यदधिकरणकः परामर्शः तदधिकरणीयपक्षतासहकृतत्वमवश्यं वाच्यं अन्यथाऽधिकरणांतरीयपक्षताभा
दायपक्षताभादाय संशयोत्तरप्रत्यक्षेप्यतिव्याप्तेस्तथा च देशांतरीयपक्षतया कथमुपपत्तिरत आह व्याप्तीति महाव्याप्तिप्र
त्यक्षजनकसहचारज्ञानात्मकव्याप्तिप्रत्यक्षेणेत्यर्थः ननु फलीभूतज्ञानविषयदृष्टिरिपपक्षतातत्तु परागकालीनत्वंवाच्य
मत आह व्याप्तीति · महाव्याप्तिप्रत्यक्षेणेत्यर्थइति तु केचित् नव पक्षतावच्छेदकरूपेपि पक्षेण पक्षे व्याप्यवत्त्वधीरूपपराम
र्शाभावत्कथमिदमिति वाच्यं पक्षेक्तसहचारज्ञानं धर्म्यंतरे विशेष्यज्ञानवह्निके अयं वह्निव्याप्यवानित्याकारकं तत्स्व
लीयपतादृशप्रत्यक्षेऽति व्याप्तिसंभवात् · तादृशेति समानाकारसिद्धेरेवविरोधितया अयं वह्निमानित्यनुमितौ वह्निव्याप्य

वान्वह्निमाननिति सिद्धेरविरोधित्वादितिभावः ननु तत्र पक्षतासत्वेऽनुमितिरेवास्तु महाव्याप्तिप्रत्यक्षं जायतामितीच्छाया प्रत्यक्षो
पयादनेनत्वसत्पांता दृशेच्छायामिति विशेषणं देयमिति आह अपिचेति · केचित्तु पक्षतावच्छेदकरूपेण पक्षे व्याप्तिविशिष्टस्य ज्ञानं
नलक्षणे निविष्टं किंतु यत्किंचिद्रूपेणेति अतो महाव्याप्तिप्रत्यक्षाति व्याप्तिः संमुखीनैव · ननु पक्षतावच्छेदकरूपेण पक्षे पक्ष
दृशोत्थानंतज्ञान्यत्वं वक्तव्यमतो नोक्तदोषइत्यतो ऽपिचेत्याद्युक्तः । धूमेवह्निव्याप्यत्वस्तिनालोकलिंगकपरामर्शाभावो लभ्यतेए
वं भावात् तद्दृशोत्थानजन्यत्वसत्वात् गद्धीजन्यं व्याप्तिविशिष्टपक्षधर्मताधीजन्यं आलोकलिंगकेच्छाधूमलिंगकानुमितौ १९
प्रतिबंधकेति न धूमलिंगकानुमितिस्तथा वसिध्यतिभावाधीनपक्षतासत्वमित्याशयः न च्चालोकलिंगकेच्छा न धूमलिं
गकानुमितिविरोधिनीतिप्रथमं धूमलिंगकानुमितिर्जायतएव जायतां वतस्यां न तल्लिंगकानुमितिस्तल्लिंगकानुमित्सा
याएव तल्लिंगकानुमितौ पक्षताघटकत्वात् किंतु तदनुमितितत्परामर्शयोरनुव्यवसायएवेत्याह ननु यदेवेति । तत्रानुमितौ त
ल्लिंगकानुमित्साविरहेत्यादिरूपेण पक्षतायास्तल्लिंगकानुमितिजनकत्वे लिंगोदासीनानुमित्सायां प्रत्यक्षादिसिद्धौ अनुमि
तिर्नस्यादिति तत्पक्षकतत्साध्यकानुमितौ पृथक्प्रतिबंधकाः ततो धूमलिंगकानुमित्युत्तरमालोकलिंगकेच्छायां न धूमलिं

शयेनाह

तौच्छैवपक्षताघटिकावाच्या तल्लिंगकसिद्धिकालीनसिद्धिकालीनाभावात तदन्यमात्रलिंगकेच्छातल्लिंगकानुमितौ पृथक्
प्रतिबंधिका · अतो धूमलिंगकानुमित्युत्तरमालोकलिंगकेच्छायां न धूमलिंगकानुमितिरित्याशयेनाह स्वाविरोधीति तत्पक्ष
कतत्साध्यकानुमितौ विरोधीत्यर्थः तेन प्रत्यक्षत्वाद्यवच्छेदकेच्छा लभ्यते न सिषाधयिषा धूमजन्यायां अनुमितौ विरोधित्वेपीत्यन्वयः
केचित्तु धूमपरामर्शस्तत्र तदिच्छासामग्रीबलवत्वात् स्वाकालीनाया अनुमितीष्टसाधनतादिविषयकस्मरणात्मकसिद्धेर्वावि
रोधित्वादनुमित्यनुत्पत्तौ आलोकेन वह्निमनुमिनुयामितीच्छा ततः फलेच्छाया उपायसंपादकत्वेन तदुत्थितसामग्र्या उपा
यान्तरविरोधितयानुमित्यनुत्पत्तौ आलोकलिंगकपरामर्श उपनीतभानरूपो धूमपरामर्शानुव्यवसायरूपश्चोत्पत्तिर्व्याप्ति
रित्यपिचेत्यादेरर्थः ननु तत्र पक्षतासत्वेऽनुमित्यापत्त्या तद्घटकत्वरूपेण पक्षताया हेतुत्वं वाच्यं विरोधीच्छाभावस्य स्वात
न्त्र्येण हेतुत्वे गौरवादित्याशयेनाह · ननु यदेवेति तत्सिषाधयिषायाः इति पंचमी तत्सिषाधयिषाप्रयुक्तः पक्षताया अपाय
इतिनेत्यर्थः । तथा च स्वातंत्र्येण तदिच्छाभावस्यानुमितौ हेतुत्वं ननु पक्षताशरीरघटकतया दाहेमध्यादीनामभावस्येवे
त्याद्युक्तः ननु तदन्यमात्रलिंगकप्रकारिकानुमितीच्छा पक्षताघटिका वाच्या तेन लिंगोदासीनानुमितीच्छा साधारण्यं

यदि वान्यमात्रलिंगकेच्छात्वेनैव तल्लिंगकानुमितिप्रतिबंधकत्वं तेन सिद्ध्यभावाधीनपक्षतासत्त्वेपि प्रागेवंपि न धूमलिंगका
नुमितिस्तदा सत्यामन्यमात्रलिंगकेच्छायामिति वाच्यं विरोधिज्ञानस्योत्पादे एव ज्ञानोत्पत्त्यागे न विरोध्यनुपरागकालीनत्वम
र्थो वाच्योऽतो नोक्तानि व्याप्तिरत आह· किंचेति· प्रमा· वाह्निमत्ति वह्निप्रकारकं यः परामर्शः इति प्रमात्वव्याप्य वह्निव्याप्यव
द्विशेष्यकवह्निज्ञानत्ववदिदं ज्ञानमित्याकारकमित्यर्थः। वह्निनिश्चय इति प्रामाण्यादिकोटिस्मृत्यादिना व्यवसायनाशे २०
पि स्मरणात्मकवह्निसिद्धिसंभवादिति भावः। असत्त्वप्यत्वादिति यत्र वह्निमान्नवेति संशयस्यैव वह्न्यंशे प्रामाण्यानुमिति
स्तत्र वह्निनिश्चयाभावेन पक्षतासौलभ्यादिति तु तत्त्वं अन्यथा अप्रामाण्यज्ञानास्कंदितनिश्चयस्यापि पक्षताघटकत्वे· ननु
प्रामाण्यानुमिति अनंतरमर्थविशेष्यकत्वाभं नापेक्षणीयं प्रामाण्यानुमितौ नित्तएव प्रवृत्तेरुपपत्तेरर्थविशेष्यकज्ञानत्वेन प्रवृत्ता
वहितुत्वादतः किंचेत्यनेनेति एवं सति अप्रामाण्यज्ञानास्कंदितसिद्धेर्विरोधित्वे सति तस्या अपि प्रामाण्यानुमितेरपि पदार्थांतरेति
वह्निमद्विशेष्यकत्वे सति वह्निप्रकारकत्वं प्रामाण्यं तत्र च विशेष्यकतांशे वह्निप्रकारकत्वांशयोः प्रागेव ग्रहाद् गृहीतवह्निमत्त्वां
श एवानुमानं सप्रयोजनमिति भावः इदं चापाततः समानप्रकारकसिद्धेरेव विरोधित्वेनापि वह्निमानिति सिद्धेर्विदं विशेष्य

कवह्निज्ञानं वह्निमद्विशेष्यकत्वावच्छिन्नवह्निप्रकारकत्ववदितीयनुमितावविरोधित्वादन्यथा अर्थनिश्चयोत्तरं प्रामाण्यसंशयो
पि न स्यात् यत्तु प्रामाण्यं वह्निमत्पुरोवर्त्तिविशेष्यकत्वघटितमेव वाच्यमन्यथा वह्निभ्रमस्यापि सामान्यलक्षणया वह्निमद्विशेष्य
कत्वात्प्रमात्वं स्यादिति तथा च प्रामाण्यानुमितिरपीदंविशेष्यकवह्निप्रकारिकेत्ययं वह्निमानिति सिद्धेस्तद्विरोधिनी तदंशे समा
नप्रकारकत्वादिति तन्न· पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकावच्छिन्नसाध्यनिर्णयो हि पक्षताविरोधी न तु पक्षतावच्छेद
कावच्छिन्नं घटकपदार्थनिर्णयोपि तादृशपक्षकानुमितौ विरोधी अन्यथा अयं पर्वतो वह्निमानित्यनुमितिर्न स्यात् परामर्शेऽपि
पर्वतत्वस्यापि विषयत्वेन सिद्धिसत्वात् प्रकृते तु प्रामाण्यानुमितौ प्रामाण्यत्वं साध्यतावच्छेदकं पुरोवर्त्तिविशेष्यकवह्निज्ञानत्वं प
क्षतावच्छेदकं न तु पुरोवर्त्तिपक्षो वह्निः साध्य इति कथं तन्निर्णयस्याविरोधित्वमिति परामर्शस्येति वह्निव्याप्यवत्तस्य व्याप्यताव
च्छेदककोटौ निवेशादिति भावः व्याप्यवत्त्वधीजन्यत्वमिति पाठः सम्यक् नन्वत्रापि पक्षतासत्त्वेनानुमितिरेव जायते न तु प्रा
माण्यानुमितिहेतुपरामर्श इत्यत आह· यदपीति· अंशत्वेन या श्वैत्यानुमितिस्तत्र व्याप्तिरित्यर्थः· अश्वैत्यस्य श्वैत्याभावस्य
विरोधिज्ञानेति विरोधिपक्षज्ञानं तदनुपरागेत्यर्थः अत एव वा यत्सामग्रीकालीनपरामर्शजन्यानुव्यवसायस्यापि वारणं· उपा

व्याप्यमत्वेनैकत्र परामर्शे प्रामाण्यग्रहात्मकत्वाद्बाधसामग्र्या इति अप्रमात्वज्ञानस्य प्रामाण्यशंकास्कंदितत्वेनाविरोधित्वादिति भा
वः साधकमानस्यासिद्धेः अत एव उक्तविशेषणादिवैभावात्साध्ये नवक्षाः संयोगात्मिकायाः प्रत्यक्षसामग्र्या विरोधिज्ञानत्वा
भावात् संशयोत्तरप्रत्यक्षवारणायेममेव तात्पर्यकमिति वाच्यं विरोध्यनुपरागकालीनत्वोक्तावेव सामंजस्ये तद्विशेषणसार्थ
क्याच्चाज्ञानपदप्रक्षेपस्यानौचित्यात् एवमपि स्वोक्तपक्षतायां सिद्धिप्रवेशस्यानर्थक्याच्च न चाप्रामाण्यज्ञानान्यविरोधि २२
विषयकज्ञानानुपरागकालीनत्वं वाच्यं यत्र परामर्शविषयत्वेनेच्छया तादृशप्रत्यक्षं तत्रातिव्याप्तेः न चानुमानातिरिक्तं समा
नविषयकं भिन्नविषयकं वा फलोपहितकारणाच्च कृतेतदभाव एव पक्षतेति वाच्यं। एवं सति तादृशपक्षताकालीनज
न्यज्ञानत्वमित्यस्यैव लक्षणत्वे विशेषणान्तरवैयर्थ्यादिति पक्षधर्मतेत्यत्र पक्षताया विशेषणत्वमभिप्रेत्याह॰ पक्षतेति
अत एवायं उपोद्घातसंगत्या पक्षतानिरूपणमपीति भावः तद्धीति व्याप्तिविशिष्टपक्षधर्मताधीत्यर्थः तत्वेनेति॰ प
क्षतात्वेन जनकत्वविवक्षणे सामान्यप्रत्यासत्तेः ज्ञायमानसामान्यत्वेनैव जनकत्वात् पक्षतासामान्यजपक्षप्रत्यक्षे
पक्षतात्वेनाजनकत्वा इति व्याप्यभावेन तद्धीजन्यत्वस्य वैयर्थ्यापातादिति भावः न च संगच्छति तथा च तद्धीत्यपि शेष

णं व्यर्थमिति भावः अन्यथा स्वरूपसदिति वीस्यानुक्तौ यः प्रमानुमितिविषयः पक्ष इति प्रमानुविषयपक्षत्वस्य लिं
गस्य ज्ञानस्य व्याप्तिप्रत्यक्षे कारणत्वमित्याशयः एवमपि तद्धीजन्यत्वस्य विवक्षणे तत्र साध्यज्ञानतया व्याप्यव
त्वज्ञानस्यापि जनकत्वादिति भावः इदं च पक्षतादृशव्याप्तिप्रत्यक्षे ध्यात्रत्र बोध्यं अन्यथा सामग्रीसत्वे च अनुमित्या
पत्तेरनुमित्यनंतरं च पक्षताया असत्वेन तदन्यत्वादिति व्याप्यनवकाशादिति॰ ननु सामान्यप्रत्यासत्तितया पक्षता
या व्याप्तिप्रत्यक्षे हेतुत्वमस्त्वेवेत्यत आह पक्षताया इति किंत्विति पक्षताज्ञानस्य हेतुत्वमिति शेषः तत्प्रत्यक्षेति पक्ष
प्रत्यक्षेत्यर्थः। यद्यपि सर्वाधिकरणावच्छेदेन व्याप्तिग्रहे पक्षतायाः सामान्यप्रत्यासत्तितया जनकत्वमस्त्येवेति तथापि
एकावच्छेदेन तदुभयजन्यत्वस्याव्यभिचरणीयस्याभावान्न तत्रातिव्याप्तिरिति भावः ननु ज्ञायमानसामान्यस्य
प्रत्यासत्तित्वे अतीतघटप्रत्यासत्त्यानवच्छिन्नप्रत्यक्षजनस्यातस्या अतत्पुरुषीय[illegible]वत्कालीनत्वप्रवेशे नानंतकार्यका
रणभावप्रसंग इत्यत न तद्धीपदस्य व्याख्यान्तरमाह॰ सिषाधयिषेति तयोः समूहालंबनेति यद्यप्येकावच्छेदेन तदुभ
यजन्यत्वस्याभावान्न तत्रातिव्याप्तिस्तथापि यथाश्रुताभिप्रायेणेदं पक्ष[illegible]मतापरत्वयोजनं तु वक्ष्यते। समूहेति

समूहालंबनरूपोऽनुव्यवसाय इत्यर्थः द्विवचनांतपाठे तु समूहालंबनं अनुव्यवसायो वेत्यर्थः तत्रानुव्यवसायेप
रामर्शस्यात्मविशेषणतयाभानमिति समूहालंबनतो भेदः अत्र वदंति स्वयं वक्ष्यमाणायाः पक्षतायाः कालगर्भ
त्वेन तत्प्रत्यक्षासंभवः न च सिद्धिप्रतियोगिकात्यंताभावत्वेन विशेष्याभाव विशिष्टाभाव साधारणेन प्रवेशो ला
घवात्तथा च योग्यविशेष्याभावमादाय प्रत्यक्षसंगतिः पक्षादि द्वित्रिक्षणोत्तरितायामपि सिषाधयिषायां पुनः २२
सिषाधयिषोत्तरोत्पन्नो वानुमितिरिति मतेन विशिष्टाभावरूपैव पक्षता वाच्या सा च योग्यापि यद्वा नीसिषाध
यिषाविरहविशिष्टासिद्धिः स्यात्तत्रोपलभ्येतेत्यापादनं संभवादिति वाच्यं तथापि वाद्यादिस्थले पक्षताप
रामर्शयोः समूहालंबनेन संभवेन तत्रातिव्याप्तेः किं च सिषाधयिषात्मकप्रतियोगिविषयकपरामर्शजन्ये सिद्ध्य
भावप्रत्यक्षेऽतिव्याप्तिः न च परामर्शत्वेन जनकत्वं एकावच्छेदेन च तदुभयजन्यत्वं विवक्षितमतः सिध्यभाव प्र
त्यक्षे प्रतियोगिधीत्वेन परामर्शजन्ये विभिन्नावच्छेदेन तदुभयजन्येपि पक्षतापरामर्शसमूहालंबने च नातिव्या
प्तिरिति वाच्यं तथासत्यसंभवापातात् तत्पक्षकतत्साध्यकानुमितित्वं पक्षतायाः तत्पक्षकतत्साध्यकतल्लिंग

कानुमितित्वं च परामर्शस्य जन्यतावच्छेदकमित्यवच्छेदकभेदात् किंचैवं परामर्शत्वेन जनकत्वविवक्षायैव सामंजस्ये एकाव
च्छेदेनेति व्यर्थं परामर्शप्रत्यक्षे परामर्शत्वेन जनकत्वाभावादिति ॥ अत्र नव्याः ॥ सुखव्याप्यदुःखवान्वह्निमिदंद्रष्टानं प
क्षतावेति समूहालंबने परामर्शत्वेन परामर्शजन्येऽतिव्याप्तिरित्यत उक्तं एकावच्छेदेनेति तत्र सुखव्याप्यदुःखवानि
ति परामर्शजन्यतावच्छेदकं तादृशभेदप्रत्यक्षत्वं पक्षतायाः पक्षताप्रत्यक्षत्वमिति नातिनापि व्याप्तिः सिद्धौ सत्यामपि
न्नलिंगकानुमित्सायामनुमितेरभावात् तल्लिंगकानुमित्साविरहविशिष्टत्वादिरूपैव पक्षता वाच्यं तज्जन्यतावच्छे
दकं च तल्लिंगकतत्पक्षकतत्साध्यकानुमितित्वं परामर्शजन्यतावच्छेदकमपि तदेवेति संभवः न च सामानाधिक
रण्येन सिद्धेरवच्छेदकं नानुमितिप्रत्यविरोधितयात दभावात्मकपक्षतायाः सामानाधिकरण्येनानुमितित्वं जन्यताव
च्छेदकं न तु परामर्शस्येति वाच्यं अवच्छेदकावच्छेदेन सिद्धेरभावरूपायाः पक्षताया एव प्रकृते निवेशात् अनुमितिद्व
यं प्रत्येव तस्या जनकत्वेन तज्जन्यतावच्छेदककोटौ सामानाधिकरण्यादेरप्रवेशात् अत एव पक्षताधर्मतापदमपि
सार्थकं व्याप्तिधीजन्यतायां तत्पक्षकस्यानिवेशात् यदि च भिन्नलिंगकेऽप्यस्वातंत्र्येणोवानुमिति प्रति बंधकतात
ने

क्ष्यपक्षताजन्यतावच्छेदके तल्लिङ्गकत्वं नानिविशतम् निविभाव्यते तत्र विषयतासंबन्धेन एकावच्छेदकं विवक्षि
तं साध्यवत्पक्षत्वएवोभयोर्जन्यतायां विषयतयाऽवच्छेदकः। नवतल्लिङ्गकत्वं तत्परामर्शाव्यवहितोत्तरत्वमिति परा
मर्शजन्यतायां तल्लिङ्गकानुमितित्वमेवावच्छेदकमस्तु तावतैव व्यभिचाराभावादिति वाच्यं अनुमितेः पक्षविशेष
विषयतायां तादृशपरामर्शस्यैव नियमकतया तज्जन्यतावच्छेदके तत्पक्षकत्वतत्साध्यकत्वयोरपि प्रवेशात्। अन्यथा २३
व्यवहितोत्तरस्वस्य विशिष्टतया वह्निव्याप्यवानिति परामर्शाज्जलह्रदो वह्निमानिति पर्वतो घटवानिति वा
नुमितेः कदाचित्स्यात् एतेन पक्षताऽभावो न वेति संशयोत्तरप्रत्यक्षेऽभाववत्व्याप्यवती पक्षतेति परामर्शजन्ये वि
षयतया पक्षताजन्ये वातिव्याप्तिर्निरस्ता। तत्र पक्षताजन्यतायां पक्षतायाः परामर्शजन्यतायां च व्यभाववत्वविशिष्टप
क्षताया विषयतयाऽवच्छेदकत्वात्। यत्तु यत्साध्यकः परामर्शस्तत्साध्यकपक्षताबोध्या तेन पक्षताव्याप्यवान् यमिति
परामर्शजन्ये पक्षतायाः संशयोत्तरप्रत्यक्षे नातिव्याप्तिरिति तन्न। तत्रापि पक्षताविशिष्टस्यैव परामर्शजन्यतायाः
मवच्छेदकत्वात् न तु केवलपक्षतायाः इत्येकावच्छेदेनेत्यस्याभावात् तद्वृत्त्यनुभवत्वव्याप्यजातिमत्वविवक्षयैव वना या

स्थिरेतत्त्वाचैवं भायेव वरमज्ञानपरमित्याहुः यथाश्रुताभिप्रायेणाशङ्कते। नवेति एवं पक्षताजनकत्वविवक्षणे प
याश्रुते न समाधत्ते सिषाधयिषेति एवमन्यत्रापि तन्नांशे सिषाधयिषानाशे प्रतियोगितया सिषाधयिषाजन्ये विरो
धिगुणतयाव परामर्शजन्ये इत्यर्थः। संबन्धान्तरेति विशेषणान्यसंबन्धेनेत्यर्थः। ननु विशिष्टाभावो व्यतिरिक्त ए
वसंबन्धाभावे पक्षेपि तदुभयोरेव संबन्धत्वान्न तद्वच्छिन्नसंबन्धाभावो व्यतिरिक्त एव अन्यथा सिषाधयिषामात्रस्य
पक्षतात्वे घनगर्जितादेर्मेघानुमानं नस्यादित्यस्वरसादाह यद्वेति भ्रमांशप्रमेति ह्रदो वह्निमानित्यनुमितेरपि
ह्रदांशे भ्रमात्वात्तदसंग्रहः स्यादित्यर्थः। नवैवं सर्वांशे भ्रमानुमितेरभावात् भ्रमांनुपदव्यावर्त्याप्रसिद्धिः यत्र वह्नि
त्वरूपेण गुञ्जायां व्यापकत्वं गृहीतं पर्वतत्वरूपेण च ह्रदादिकं स्मरणात्मकपरामर्शाभावात् तत्र पर्वतो वह्निमानित्य
नुमितेः सर्वांशभ्रमरूपायाः व्यावर्त्यत्वात् तत्रानुमितेरपि पर्वतत्वेन ह्रदस्य वह्नित्वेन च गुञ्जाया विषयत्वात्। इद
मुपलक्षणं ध्वंसप्रागभावच्छिन्नपक्षकभ्रमानुमितावतिव्याप्तिरपि बोध्या। भ्रमांशप्रमायां प्रमांशावच्छेदेनातिव्याप्ति
वारणाय वरमज्ञानपदं प्रमापरमिति तु कश्चित् केचित्तु भ्रमांशप्रमा। भ्रमात्मकपरामर्शजन्यजनितायां विषयाबाधेन प्र

मातत्रेतात्पर्यं : अत एवोक्तं : अन्यादि ग्रंथविरोधः अग्रे समाधास्यमानत्वात् इत्याहुः ननु व्यतिरेकिण्यनुमितौ व्याप्तिः तत्र प
रामर्शव्याप्तिविशिष्टस्य पक्षधर्मताया अविषयत्वादत आह व्यतिरेकिणीति मणिकारमतमाशंक्यते परित्यजति मत्वे वेतत्सा
ध्यकतावच्छेदकानुमितिं प्रति व्याप्तिज्ञानस्य जनकतायां व्यभिचार इत्यत आह तदनुभयेति · तल्लिंगकतत्साध्यव्याप
कधीविरोधिधीत्वेन व्याप्तिज्ञानं तल्लिंगकतत्साध्यकानुमितौ हेतुरित्यर्थः वक्ष्याम · इति यदि वेति नातिभावः
ध्रौव्येपीति न चायं तदनुपस्थितिदशायामेवं तत्र लक्षणस्य सार्थक्यमित्यापन समाधानमत्रेतात्पर्यं : तस्यानुमितित्वस्य २६
कपक्षीणस्य प्रत्यक्षानुमितावुपयुक्तस्य तथा वेति हेतुसाध्यकं सामानाधिकरण्यग्रहकालएव पक्षतावच्छेदकसाध्य
सामानाधिकरण्यावगाहनेनसिद्धसाधनादितिभावः नन्वनुमितौ समानकारसिद्धेरेव विरोधित्वादनुमितिरितरेभ्यो
भिद्यत इत्यनुमितौ अनुमितित्वमितरभेदव्याप्यमिति धीर्न विरोधिनी त्यत आह यद्वेति तदुपस्थितीति अनुमितीतरो
पस्थितीत्यर्थः ननु तथापि पक्षतावच्छेदकतया न तदुपतिष्ठेवेत्यत आह तन्नादिति तत्र व्यक्तित्वेनैव पक्षतेत्यर्थः
पक्षतासहकृतत्वाविशेषणपरित्यागेन लक्षणांतरमाह एवकेनापीति · ज्ञानं निश्चयः इदं च पक्षतत्वयोरनुगतत्व

ज्ञानजन्यामितं तरं तादृशजन्यतावच्छेदकं जातिमसिद्धिविशेष : इत्थं च परामर्शप्रमात्वं नानुमित्येतावतैव विशेष्यवि
शेषणमितिन्याधकस्य नैननुयत्वतत्वयोरननुगमेन व्याप्याद्देरननुगमात्परामर्शत्वं नैकं अनुमितित्वावच्छिन्नं
प्रति जनकतायां ज्ञानत्वेन जन्यज्ञानत्वेनैव वाऽवच्छेदात् परामर्शत्वं जातिरपि न अन्यथानुत्पन्नाया हि धूमसाधन
ताध्यानत्वस्यापि तादृशजातित्वे संकरापत्तेः अतः पूर्वोक्तविवक्षाद्वयेपि वह्न्यादिव्याप्तेरेव विशिष्यावधारणेनाद्द
शपरामर्शजन्यतायामनुमितित्वस्यातिप्रसक्तत्वेनावच्छेदकत्वासंभवेनासंभव इत्यतो मणिकारमतेन तत्र वक्ष्याम इति
यतुक्तेन तदाह यदि वेति व्याप्तिज्ञानं व्यापकत्वज्ञानं तद्धेतुकतत्साध्यकव्यभिचारधीविरोधित्वेनानुगतं अन्वयिव्यति
रेकिपरामर्शयोः साधनानुगतरूपेण जनकत्वं अन्वयिव्यतिरेक्यनुमितिरूपफलयोर्वैलक्षण्यादिति वक्ष्यते · तदर्थ
वीति इत्थं च वह्न्यादिव्याप्तिविषयकपरामर्शमेव विशिष्य धूमत्वालक्षणेन संगमनीयमिति भावः अत्र ज्ञानत्वव्याप्य
त्वमत्र ज्ञानपमनुभवपरं व्याप्यत्वं च न्यूनवृत्तित्वं तेनानुभवत्वमादाय नातिव्याप्तिः तत्समभिव्याहारो ज्ञानपदस
मभिव्याहारः उक्तार्थः जातिघटितार्थः संशयोत्तरप्रत्यक्षाणि व्याप्तिवारणाय आह पक्षतेति एतन्निष्कर्षस्य प्राग

वह्नत इति ॥ ॰:॰ ॥ ननु तद्धेतु ना व्यवहितोत्तरानुमितेरेव परामर्शो ऽनुमितिकरणमिति यो न रूपत्वं स्यादत आ
ह व्याप्तीति तत्त्वतो ऽनुमितित्वं परामर्शजन्य ज्ञान अनुभवत्वव्याप्यजातित्वेन प्रविष्टं लक्षणतावच्छेदकं न स्वरूपत इति
भावः यत्तु तत्करणमित्यत्र षष्ठी न तु रूपेण तत्संबंधिकरणमर्थः अनुमानमित्यत्र च प्रकृत्यर्थस्यानुमितेः प्रत्ययार
र्थस्य करणस्य च संबंधः संबंधविषये च भासत इति कथं यो न रूपत्वमिति तन्न निराकांक्षत्वस्य दूषकताबीजस्य
स्यतत्रापि सत्वात् न ह्यनुमितिकरणत्वेन ज्ञाते ऽनुमितिसंबंधिकरणं न वेत्याकांक्षेति व्यवहितपरामर्शस्य रसाद्य २८
हः यद्वेति अन्ते भयत्रे वानुमितित्वस्य स्वरूपतस्त्वविं प्रवेशः । इत्थं च व्याप्तिविशिष्टेत्यादेर्लक्षितलक्षणतावच्छेद
केवाप्रवेशेपि ताद्दश ज्ञानितस्य रूपे परिचायकतयैवोपयोग इति बोध्यं । ननु परामृश्यमानलिंगत्वेन कारण
त्वे परामर्शस्य कारणतावच्छेदकत्वमेव न कारणत्वमिति व्याप्तीत्यादिलक्षणासंभव इत्यतो मूले तच्चेति न
न्वितं नानुमानलक्षणं लिंगस्य करणतया अनुमानत्वस्य केवलान्वयित्वेनानुमानेतरासिद्धौ इतरभेदासाधक
तादवस्थ्यात् च्चेतीति कश्चित् स्वीये करणे श्रमं निवारयति वा बोधक इति ननु नव्यमते ऽनुमितित्वजातेरभावादनु

मानं प्रमाणमिति सिद्धासिद्धिपराहतमित आह धूमेति धूमदर्शनानंतरं या वह्न्यर्थिप्रवृत्तिजनिका धीः सा तन्मते संभावनास
ध्यांशे उत्कटकोटिकसंशयरूपा अस्मन्मते त्वानुमितिः स्वकरणमित्यर्थः यभिचारसंशयादितिमूलं यभिचारसंशय वि
षयत्वविषयकत्वादित्यर्थः ननु नियतसंवादे व्याप्तेरेवाभ्युपगमः तथा च प्रामाण्याभिमानोपि न प्रामाण्यस्यैव संभवादत आ
ह कादाचित्केति कदाचित्कत्वादित्यर्थः । वस्तुतः संभावनीया निर्विकल्पकरूपप्रत्यक्षप्रमाविषयस्वलक्षण व्यक्तिविषयत्वा
संभवात् संवादपदं संवादाभिमानपरं तथा च तेन धूमदर्शनानंतरजातसंभावनाव्यक्तेः प्रामाण्याभिमान इति मूलार्थः
आप्तोक्तत्वादित्यादिना आकांक्षातात्पर्यपरिग्रहः शाब्दस्य न प्रसंगः प्रमाणतया अनुपक्रमात् साध्यतया ऽनुपक्रमात्
अनुपक्रमत्वादितिपाठे उपक्रमः प्रतिज्ञा तथा च प्रतिज्ञाविभावादित्यर्थः न प्रत्यक्षं प्रमाणमित्येव प्रतिज्ञातत्र हेतुतया
वनदुपन्यासइत्याशयः नन्वनुपक्रमो पसंहारविरोधो न नियह स्थानमत्र स्फुरत्येव स्फुरयति उपक्रमेति प्रतिज्ञातस्यैवोपसं
हारे अनुवादत्वान्निग्रहयोजनाजिज्ञासायां अबाधितत्वादिप्रतिपन्निर्भवतीति नन्वित्यतिभावः नाप्रत्यक्षमिति मूले नानुमा
नमित्यर्थ इति कश्चित् व्याप्तिग्रहोपायश्चेत्युत्तरग्रंथानुरोधात् तात्पर्यविकल्पपतिन न्विति कार्यव्याप्तिग्रहरूपं मूले

दृष्टसाध्यसाधनवत्त्वपादृष्टेष्टदृष्टांतत्वसाधर्म्यं निपतनमित्यर्थः श्रोतॄणीं बोधयेवेति शाब्देनाप्रामाण्यस्मृतौ असंसर्गाग्रह इति
ज्ञेमेणैवेत्यर्थः अतो नाप्रत्यक्षाप्रामाण्यस्वीकारेनस्यापसिद्धांतः अतएवोक्तं विधयैवेति संभावनयैवेति तथा चपर
कीयसंदेहादिकं संभाव्यैव तन्निरासाय शाब्दप्रयोग इति भावः अप्रामाण्यं अप्रामाण्यपदार्थः अप्रमाभ्रमः तच्छाद्यानभ्रं
रूपं न तु ताहिं शाब्दप्रयोगः किमर्थमत आह असंसर्गेति शाब्देन स्मृतेऽनुमानेस्मृतस्य प्रामाण्यस्यासंसर्गाग्रहाद्वयोक्तिनस्या २५
नुमानाप्रामाण्यव्यवहारादेः सिद्धेरित्यर्थः मूले प्रत्यक्षस्यापीति अत्यक्षप्रमितेः प्रमात्वाग्रहे प्रमाकरणत्वस्यापि दुर्ज्ञे
त्वादिति भावः। द्वितीये सामग्र्यभावे कथं कार्यमिति प्रश्ने अव्यभिचारितेति अव्यभिचरितत्वे सति साध्यसामानाधिक
रण्यमित्यर्थः नन्वाकाशादिवारणं वृत्तिमत्त्वेनैव निर्वहति तद्वारणं च व्यर्थमित्यत आह पदेति तत्र आकाशादिहेतो
सति व्यतिरेकिसाध्यके केवलान्वयिनो व्यभिचारित्वेनासंग्राह्यत्वमेव तेन केवलान्वयिसाध्यकत्वमेव व्याप्तिसंपाद
कं न त्वप्रमेयं घटत्वादिमत्त्वादौ व्यपीति हेतोः केवलान्वयित्वकथनेन्यूनतास्यादत आह साधारण्येन व्याख्यातं दृश इति यो
न कृत्तं हिं परिजिहीर्षुराह अन्यान्येति साध्यसामानाधिकरण्ये साध्याधिकरणत्वान्यताभाववद्वृत्तित्वं साध्यवैयधि

र्थक्यं विरहवृत्तित्वस्य स्वाधिकरणानिष्ठाभावप्रतियोगित्वस्य वाव्यतिरेकिधर्मेपि प्रतीतिसिद्धिसंभवादाकाशपर्यंतानुधा
वनस्य वैयर्थ्यात् एवं स्वाधिकरणाधिकरणत्वप्रवेशेऽपि तदभावतथाऽवैयर्थ्यमपि अतोतिप्रयोजनत्वमत आह वक्ष्य
तीति साध्यविरोधि सर्वमिति शेषः तेन व्यभिचारिणि नातिप्रसंगः व्याप्तिः नु साध्यविरोधित्वं साध्यानधिकर
णवृत्तित्वं तथा चासंभवः व्यतिरेकिसाध्यकेपि साध्यानधिकरणवृत्तेः प्रमेयत्वादेर्हेतुसमानाधिकरणत्वादत आ
ह साध्याधिकरणेति अत्र च साध्याधिकरणवृत्तित्वाभावव्यापकोपदवाच्येनाधिकरणवृत्तित्वाभाववत्तैं दवाच्येन त्व
मित्यर्थः तेन द्रव्यं कर्मान्यसत्त्वादित्यादौ साध्याविरोधिनो गुणत्वादेः सत्ताधिकरणवृत्तित्वेपि न क्षतिः वृत्तित्व द्रव्यं
त्वाभावीयविशेषणानाविशेषणाव्यभिचारिणि च साध्यवद्भेदेऽवसाध्यवद्वृत्तित्वाभावसत्त्वात् हेतुमद्वृत्तित्वस्यासंभ
सत्त्वान्नप्रसंगः प्रमाविषयत्वीयविशेषणताविशेषणेन वा तद्बोध्यं तेन इदं मेयत्वान्नतम्भिन्नं प्रमेयत्वादित्यादावेकमा
दीवि त्रं पक्षे केव्यभिचारिणि एकविशेषणावात होध्यं तेन इदमेतत् मात्रवृत्त्यभावासत्त्वेपि न क्षतिः एतद्रूपत्वप्रकारकप्रमावि
शेष्यत्वस्येतद्रूपमात्रवृत्तेः साध्यवद्वृत्तेः संभवादिति सत्त्वथा असाध्यसामानाधिकरण्यानाधिकरणः तथा असाध्य

सामानाधिकरण्यानधिकरणेन व्यभिचारित्वेति पाठः सुगमः तदभावस्यैव साध्याभावस्य च साध्याभावे सर्वस्मिन्साध्य
विरोधिनि तद्धि हेतौ साध्यसामानाधिकरण्यधीः व्यापकत्वेति केवलव्यापकत्वेत्यर्थः साधिकरणत्वमिति पद्य
व्यक्त्यपि वैयर्थ्यमसमाहितमेव ज्ञातिव्याप्त्यादौ येरकत्वात् तथाप्यनुमितिकारणीभूतज्ञानविषयतापर्याप्त्यधिकरणस्येव
प्रकृते लक्ष्यत्वमिति सामानाधिकरण्यप्राशवने ऽसंभवस्येति तत्कारणार्थं साधिकरणपदमिति भावः पूर्वोक्तसंबं ३५
धविशेषादिप्रवेशलाभार्थं तदित्यन्येषामप्यभ्रमात्तस्य शेषं विद्वाणोत्तितिनेत्यादितन उक्तविधलक्षणेन दूषणे मलत्वके
मिति संबंधः वैयर्थ्यमिति वह्निमानाकाशादित्यादौ वा कुशादेर्वह्न्यधिकरणवृत्तित्वेन सत्यं तेनैव वा रणादित्तिभा
वः वैयर्थ्यमित्यनंतरं व्यभिचारि साधारणतावच्छेदकत्वेति पाठः कुत्रचित्सत्त्वादित्यादौ सत्तायां द्रव्यत्वाधिकरणानधिक
रणत्वस्यासत्त्वादिति व्याप्तिरिति तदर्थः तदनाधिकरणाधिकरणत्वे विवक्षिते सति अग्रिमेति निरधिकरणे प्रसि
द्धमेत्येवं रूपितपर्यः उपाध्यायमतमाशंकते पाठान्तिति साध्यसामानाधिकरण्यसाध्यसामानाधिकरण्याभावः तदन
धिकरणत्वमित्यत्राधिकरणत्वांशस्यानतिप्रयोजनतया तदभावमात्रलाभात् । साध्यसामानाधिकरण्यपर्यवस

न्नं सतिसह्याप्यावावच्छेदकत्वं प्रत्याय्यते तद्व्यापकत्वरूपं साधिकरणत्वं च साध्यसामानाधिकरण्यं तस्यैव साध्यसामाना
धिकरण्यव्याप्यत्वात् तदवच्छेदकतासंबंधेन वा व्यापकत्वं बोध्यं पर्वते धूमे वह्निसामानाधिकरण्यमिति प्रत्ययात्पर्वत
दिरूप्यवच्छेदकतासंबंधेन वह्निसामानाधिकरण्याधिकरणत्वात् इत्याशयेनाह तत्सामानाधिकरण्यस्येति तत्सामा
नाधिकरण्यं व्यापकं यस्य एवंभूताऽधिकरणता यस्य तत्त्वमित्यर्थः संदर्भविरोधं विदूषयति न हीति तथा सति साध्य
सामानाधिकरण्यसत्त्वे त्वेव ब्रूयादिति भावः वाचस्पतिमिश्राणां मतमाशंकते यद्यपीति विरोधित्वं एकावच्छेदेन तदभा
वनियतत्वं यदधिकरणे साध्यानधिकरणवृत्तित्वं तदधिकरणे साध्याधिकरणवृत्तित्वस्याभावादिति उभयोः साध्यानधिकर
णाधिकरणत्वसाध्याधिकरणानधिकरणत्वयोः । वह्निमानाकाशादित्यादौ साध्यानधिकरणत्वाभाववत्त्वाकाशादेर्वा
णायसाध्याधिकरणत्वं वृत्तिमत्त्वार्थकं साध्याधिकरणानधिकरणत्वमाश्रयनिरधिकरणत्वपादिग्रंथाविरोध इत्यर्थः
मिलितस्याभावद्वयघटितलक्षणस्य । उभयत्र केवलान्वयिनि व्यतिरेकिणि च अन्वयिनि तदनधिकरणाप्रसिद्धेः
वतादृशाभावप्रसिद्धिः वह्निमान्धूमादित्यादौ यद्यप्यभावद्वयं धूमादौ वर्त्तत एवेति नैतद्दूषणं तथापि तादृशाभावद्वय

घटितंलक्षणंनास्तीवह्न्यनधिकरणत्वाभावेनैवाकाशादिव्याप्तिवारणेसाधिकरणत्वविशेषणंकस्यैवेत्यर्थेननतद
भावइत्यघटितसमानाधिकरणत्वस्यलक्षणत्वाभावात्नादृशसामानाधिकरण्ययोर्द्वित्वावच्छिन्नाभावविवक्षणेतुद्व
यसत्त्वादित्यादौव्यभिचारापत्तिव्याप्तिरेवेतिभावः।अव्यापकत्वात्असंभवात्उभयासत्त्वेनउभयत्रासत्त्वेनव्य
तिरेकिणिसत्त्वेपिकेवलान्वयिन्यसत्त्वात्उभयत्रासत्त्वमतएवाहाव्यापकत्वादितिकेचित्उभयस्यासत्त्वेनेतिकेचि ३६
त्पाठः।तत्रोक्तविरोधित्वेनानुगतस्योभयस्यकेवलान्वयिन्यसत्त्वेनाप्यप्रसिद्धेरित्यर्थः।अतएवाहप्रत्येकस्योभयस्यानि
र्देश्यंउभयत्वाश्रयस्यप्रत्येकस्येत्यर्थः।अननुगमादितितदनधिकरणानधिकरणत्वघटितलक्षणस्यकेवलान्वयि
न्यव्याप्त्यानन्तरंतदनधिकरणानधिकरणत्वघटितस्यवक्ष्यमाणविशेषणतयालक्षणत्वासंभवादितिभावः।ननुसाध्यसामा
नाधिकरण्यस्योक्तलक्षणेऽप्रवेशान्मूलेतस्यसिद्धपदार्थानुपगतमतआहसाध्यासामानाधिकरण्यमितिनअव्या
प्त्यंशेनयत्साध्यत्वमुपदर्शितंतस्यार्थः।साध्यासामानाधिकरण्यंमूलेप्रसाधितमितिभावः।तस्यैवसाध्यविरो
धित्वरूपस्यसाध्यत्वस्यैवपर्यवसितंअसाध्याभागपर्यवसितंतन्वसाध्यत्वभागस्यसाध्यानधिकरणाधिकरण

त्वमर्थेनवादिनोऽभिप्रेतमस्त्वकथंमूलेतद्दूषितमतआहयथासंभवमितिवाध्यक्रमशाद्बोधस्यवेयोतोऽर्थः।संभवंतितत
वतामेवदूषणस्यसांप्रदायिकत्वादितिभावः।मूलेपर्वतादिवित्साधिकरणानाधिकरणेधूमेवेतितथाचधूमस्यैवसाध्य
विरोधितयातत्रचधूमसामानाधिकरण्यसत्त्वादनव्याप्तिरितिभावः।एवंवासाध्यत्वेनसाध्यानाधिकरणाधिकरण
त्वंनवासाध्याकरणानधिकरणत्वमितिमूलार्थः।पृथिवीत्वेपीतिपृथिवीमात्रवृत्तिनद्वृत्तित्वादित्यर्थः।एवंच
उक्तलक्षणेचप्रतियोगिसमानाधिकरणत्वेश्रीत्यनंतरंव्यापकप्रतीश्चेतिपूरयित्वामूलमालोकश्च्याख्येयइतिविशिष्टा
भावइतिप्रतियोगिविरोधित्वादिविशिष्टतादृशाभावप्रतियोगित्वाभावः।सत्त्वेपिसत्त्वहेतुसाध्यतांयाभिमतेसंयोग
स्यविशिष्टइत्यर्थः।विशिष्टाभावोविशिष्टाभावघटितंलक्षणंसत्त्वेपक्षीतिवाऽर्थः।यद्वासत्त्वेपिप्रतियोगितत्प्रति
योगित्वसत्त्वेपिविशिष्टतत्प्रतियोगित्वाभावोक्षीतित्साध्यकव्यभिचारिमात्रएवातिव्याप्तिरित्यर्थः।भेदाभेदयोरे
कत्वेतिशेषः।अतएवएकदेशिमतंनस्वमतमित्यवधेयमित्यर्थः।मूलेपक्षाद्यर्थेतिहेतुनासहसाध्यवतन्मध्यापकसाध्या
धिकरणत्वंसंबंधःव्यापकत्वंपर्यवसितकारकत्वंतेनव्याप्यव्यापकभावेतिसंगतिरितिभावः।मूलेसाध्यसाधनयोः

साध्यत्वसाधनत्वयोः साध्यं साध्यतावच्छेदकावच्छिन्नं साध्यं पर्वतीयवह्नेर्महानसीयसनिष्ठान्योन्याभावप्रतियोगितावच्छे
दकत्वेपितदवच्छेदकत्वं पर्वतीयत्वसामानाधिकरण्यविशिष्टवह्नित्वविशिष्टेप्याप्नोतीति ननु शुद्धवह्नित्वविशिष्टइतिभा
वः सामान्यधर्मः साध्यतावच्छेदकावच्छिन्नसाध्यरूपः सामान्याभावत्वेनेपि प्रकृतलक्षणमक्षतं नमे वेत्यत आह तथा चेति
इदं च विशेषाभावप्रतियोगितानां सामान्यधर्मेणावच्छेदकत्वाभिमाने नन्वतरथा त्वव्याप्तेरेव यावद्विशेषाभावानाम ३०
पिचालनीन्यायेन धूमसमानाधिकरणत्वादिति ध्येयं न चेति यावत्त्वं प्रतियोगित्वेनैवाच्यीयते नत्वभावेन यावंतिरूपित
प्रतियोगित्वस्याप्रसिद्धेर्यावद्विशेषाभावानामिति लिखनं तु विवक्षितार्थपर्यवसायकतया तत्साध्येपि तस्य व्यभिचा
रिणः साध्यवत्यपि यवद्धर्माधिकरणत्वस्याप्रसिध्यानानाश्रयकसाधनस्थले वैयधिकरण्याप्रसिद्धेरादत्येकमि
तितरनधिकरणेति उक्तं वैयधिकरण्यानधिकरणेत्यर्थः व्यभिचारिणि धूमसाध्यवह्नौ मत्र यावद्वृत्तित्वेन धूम
स्येत्यनंतरं न प्रसंग इति शेषः न तु स्वोक्तं वैयधिकरण्यपदार्थे स्थले उक्तदोषासंगतिरित्यत आह यथासंभवमिति
यथासंभवमेव स्फुटयति तद्धनधिकरणेति उक्तं वैयधिकरण्यानधिकरणेत्यर्थः व्या वेत्यादिना

व्यतिरेकित्वेन धर्मविशेषेणापि ना इत्थं महानसत्वानधिकरणवृत्तित्वस्य पर्वतीयवह्न्यादौ सत्त्वादव्याप्तिरेवेति भावः
अनधिकरणत्वमिति मूलं तदधिकरणानधिकरणत्वमित्यर्थः न च तदधिकरणमनधिकरणं यस्येति विग्रहवाक्यस्यानधिक
रणपक्षाश्रयएवविकल्पितत्त्वात इति वाच्यं तथा च तत्रानधिकरणशब्दार्थस्य तदधिकरणविशेषणत्वेन तदन्यतमभाववत्त्वं त
दन्योन्याभाववत्त्वं वेत्यस्यैव विकल्पार्हत्वादिति तन्निष्ठेति तत्पदेन तदधिकरणपरामर्शः एवमग्रेपि तन्निष्ठेति पाठे
तु तत्पदं धर्मस्यैव परामर्शकं धूमवह्न्यादीति वैयधिकरण्यानधिकरणत्वरूपं व्यापकत्वं धूमस्यैव वह्न्यादिः धूमव्यापको
वह्न्यादिरिति यावत्र व्यापकत्वस्य षष्ठ्यर्थत्वात्तत्राव्याप्यमित्यर्थः शंकरमिश्रास्तु महानसादावितिमूलं सिंहगुहावलो
कनन्यायेन पूर्वोक्तात्यंताभावान्योन्याभावघटितलक्षणद्वयदोषाभिप्रायेणेत एवउक्तलक्षणाभावादिति पूर्वोक्ते
लक्षणद्वयाभावादित्यर्थ इति व्याचक्रुः ननु यद्धर्मोऽन्यत्रप्रतिविंवितइत्यत्रैस्य व्याप्यान्यधर्मसंक्रामकत्वेनाप्युपपन्ने
नीलाश्रयत्वमित्यत आह हेतौ स्वनिष्ठव्याप्तीति न चैवमुपाधिपरस्य जवाकुसुमादिसाधारणयोगार्थाभावः तत्रलौ
हित्यस्य अत्र तु व्याप्तेः संक्रमणीयत्वादिति वाच्यं पत्रस्य धर्मसंक्रामकत्वस्यैवोभयसाधारणत्वात् यद्धर्मबोधकशब्द

समभिव्याहारेणोपाधिपदं प्रयुञ्जानेन शास्त्रेऽपाधिपदं व्याप्यत्वबोधकशब्दसमभिव्याहारेणापथात्रसाधनेऽव्यमुपाधिरिति
साधनशब्दस्य व्याप्यत्वविशिष्टस्वाभवकत्वादित्तिभावात् आत्माश्रय इति यद्यपि उपाधिनिष्ठव्याप्तेः तत्र प्रवेशेऽपि हेतुनिष्ठव्या
प्तेरप्रवेशाभावो त्वाश्रयस्तथापि साध्यनिरूपितव्याप्यत्वमात्रं निवेशितं न व्याप्तीनामैक्यमित्यभिप्रेत्यैवं उक्तमिति वस्तुत
स्तु एतन्मतेऽनौपाधिकत्वं साध्यव्यापकव्याप्यत्वमात्रं न तु साध्यव्यापकीभूतव्याप्यव्याप्यत्वं व्यापकतांशस्य दूषणोपाधि ३०
कस्यापि प्रकृते प्रयोजनाभावेनाप्रवेशात् तथा च व्याप्यत्वादिव्याप्यत्वेन धूमादेरपि प्रवेशात् तन्निष्ठव्याप्तेरपि प्रवेशेनात्मा
श्रय इति एवं संभवतीति ध्येयं साध्यव्यापकतांशस्य प्रवेशेऽपि साध्यसमनियतनिष्ठव्याप्तेरपि लक्षतया आत्माश्रयत्व
तादवस्थ्यं न वा न वा तद्दोष इति । आत्माश्रयेत्यर्थः इदमपि साध्यसमनियतनिष्ठव्याप्तेरपि लक्षत्वमित्युक्तं अति व्या
प्तिः लक्षणस्येति शेषः तथा चैतद्रीतिः अतः साध्यमेवोपाधिरित्यादावित्यर्थः भावाभावयोरिति गोत्वाश्वत्वयोर्भेद
रूपत्वादिव नाति व्याप्तिरिति भावः ननु संसर्गाभावप्रतियोगित्वमेव लक्ष्यमतोऽन्योन्याभावप्रतियोग्यसंग्रहो न दोषा
य तत् स्वपदे दोषान्तरमाह कार्य्यकारणभावावित्ति तत्राति व्याप्तिरिति वक्ष्यु पाठः कार्य्यघटादिकारणस्य दण्डादे

भावः प्रागभावस्तयोः कालिकसंबन्धेन सहानवस्थानादति व्याप्तिरित्यर्थः । आद्यपदात्तु द्रव्यत्वाभावगोत्वादयोः सं
ग्रहः कार्य्यकारणभावेतिपाठे कार्य्यघटादिकारणं दण्डादिस्तभावः प्रतियोगी यस्य सतथा कारणाभाव इति यावत्
तथा च पूर्वेणान्वयः कार्य्यघटादिकारणीभूतभावस्यादिः कारणं तत्प्रागभावस्तत्रेत्यर्थः कार्य्यासहितः कारणाभावा
दिरिति मध्यमपदलोपसमासेऽपि वा आगमशासनमनित्यमिति न्यायात् यद्वा कार्य्यस्य घटस्याभावो दण्डो धर्मोदि
रुभावः कारणस्य दण्डस्य धर्म्माभावो धर्मः दण्डरूपमिति कार्य्याध्वंसः दण्डरूपमिति कारणं प्रतियोगी तस्याभावः
प्रतियोगितावच्छेदकस्तयोः सहानवस्थाननियमादतिव्याप्तिरितिवार्थः अव्याप्तिरिति पाठे कार्य्य च कारणरूपो भा
वश्च प्रतियोगि तत्प्रागभावो एवं कार्य्यध्वंसः कारणरूपो भावः प्रतियोगीनयोर्दैशिकसंबन्धेन सहानवस्थानादव्याप्ति
रित्यर्थः स्वरूपसंबन्धाविशेषद्रत्पत्र विशेषपदेनाधिकरणत्वरूपोऽनुयोगित्वरूपश्च स्वरूपसंबन्धो वाच्य इत्यर्थ इति
वक्ष्यगतिः तत्र प्रकृते विशेषदेऽपि नाधिकरणत्वव्याप्यत्वैन्तरेव वाच्यानत्वनुयोगित्वस्यान्यथा धूमवान्वह्नेरित्य
त्रायोगोलकत्वाभावस्य वह्निसमानाधिकरणायोगोलकत्वानुयोगित्वेऽपि तत्प्रतियोगित्वाभावात्साधनव्यापक

त्वंस्यादित्यभिमानेनाह नन्विति पद्यासयाभावेति अभावीयं यत्तु भयं प्रति यो ग्यनुयोगिरूपं तत्साध्यं स्यादित्यर्थः
अनौपाधिकत्वेति उपाध्यंतराज्ञानदशायां उक्तोपाधिस्फूर्तिकालेप्यनौपाधिकत्वरूपव्याप्तिज्ञानं स्यादिति ज्ञाना
तिव्याप्तिरित्यर्थः कादाचित्कत्वप्रकारकप्रमाविशेष्यत्वादिरूपाखिलज्ञानोक्तानस्य सत्वे न व्याप्ति ज्ञानेरभावाद् ३९
उपाधिलक्षणासत्वेसाध्याव्यापकत्वप्रदर्शनेन स्फुटयति नस्येति अत्यंताभावान्यत्वस्येत्यर्थः ननु कादाचित्कत्व
वति अत्यंताभावान्यत्वस्य सत्वात्कथं तन्निष्ठाभावप्रतियोगित्वमत आह न त्वस्येति तत्प्रतियोगिकेस्येति तत्स्व
रूपसंबंधिनित्यर्थः घटान्यत्वस्य पृथ्वासर्वैर्हृष्टैः सहस्वरूपसंबंधोऽधिकरणत्वान्यक्षणात्यंताभावान्यत्वस्य प्र
वेरत्यंताभावैः सहतादृशः स्वरूपसंबंध इति साध्यवन्निष्ठाभावेनतादृशस्वरूपसंबंधाभयत्वात्तदभावरू
पव्यापकत्वं तस्य न संभवतीत्यर्थः घटान्यत्वस्य घटैः सहतादृशस्वरूपसंबंधो युज्यते घट इति योगि
कस्याधिकरणानिरिक्तस्यान्यत्वस्य सत्वात् अत्यंताभावान्यत्वे तु न तथा ॥ श्रीरामायनमः ॥